**2018**

**M.A.**

**Semester –IV**

**SANSKRIT**

**PAPER–403**

**Subject Code—12**

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answer wherever necessary*

Group–A

**सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः**

1. एकः प्रश्नः समाधेयः – 10

क) प्रकरणग्रन्थरूपेण मृच्छकटिस्य सार्थक्यं सोदाहरणं प्रतिपादयत ।

ख) दरिद्रस्य परिणति: कीदृशी भवितुमर्हति इति चारुदत्तचरितमाश्रित्य सोद्धरणम् उपस्थाप्यताम् ।

2. प्रश्नत्रयं समाधेयम् – 1×3

क) 'मृच्छकटिकम्' इत्यस्य का तावत् व्युत्पत्ति: ?

ख) क असीत् चूर्णवद्ध: ?

ग) केन वसन्तसेनाया: दश नामानि उच्चारितानि ?

घ) 'लिम्पतीव तमोऽङ्गानि'–इति कस्मिन् प्रसङ्गे कैनोक्तम् ?

ङ) मृच्छकटिके सूत्रधारस्य नाम किम् ? तस्य वैशिष्टयद्व्य मुल्लिख्यताम् ।

3. एक प्रश्न: समाधेय: – 10

क) मुद्राराक्षसनाटस्य नामकरणं यथार्थं न वेति विचार्यताम् ।

ख) चाणक्यचरितं मुद्राराक्षसमाश्रित्य प्रस्तूयताम् ।

4. प्रश्नत्रयं समाधेयम् – 1×3

क) 'न शाले: स्तम्बकारिता वप्तुर्गुणमपेक्षते' इति केन कस्मिन् प्रसङ्गे उक्तम् ?

ख) क: तावत् शालभाविधि: ?

ग) क: राक्षस: ?

घ) कीदृश: भृत्य: राज्ञ: मङ्गलदायक: ?

ङ) गजेन्द्रा: नरेन्द्राश्च कदा दु:खिता: भवन्ति ?

5. एक प्रश्न: समाधेय: – 10

क) जगन्नाथमतानुसारं काव्यकारणं प्रस्तूयताम् ।

ख) प्रथमकाव्यलक्षणं रसगङ्गाधरानुसारं सोदाहरणं व्याख्यायताम् ।

6. यथेच्छं चत्वार: प्रश्ना: समाधेया: – 1×4

क) जगन्नाथस्य काव्यलक्षणे 'रमणीय' इति शब्द: कथं प्रयुक्त: ?

ख) किं नाम लोकोत्तरत्वम् ?

ग) सहृदयलक्षणं किम् ?

घ) जगन्नाथकृते काव्यलक्षणे गुणालंकारादिनिवेशनं कथं न युक्तम् ?

ङ) द्वितीयकाव्यलक्षणं किम् ?

च) रसगङ्गाधरस्य तृतीयकाव्योदाहरणे कीदृश: अलंकार: वाच्य: ।

## Group–B

समेषां प्रश्नानां सुरगिरा उत्तरं प्रदेयम् 10

1. प्रमाणस्य प्रामण्यकल्पे भाष्यकारेण कीदृशं प्रमाणं स्वीकृतम् ? भाष्यकारेण कथं प्रमाणस्य प्रामाण्यं प्रतिस्थापितं सयुक्ति प्रतिपाद्यताम् ।

अथवा

न्यायमते प्रमाणं कतिविधम् ? तत्र किं नाम अनुमानम् ? तत् कतिविधम् ? प्रत्येकं सोदाहरणं व्याख्यायताम् ।

2. व्याप्तेः प्रथमलक्षणं व्याख्याय तल्लक्षणपरित्यागे करणमालोच्यताम् । 10

अथवा

व्याप्तेः सिद्धान्तलक्षणं व्याख्याय तस्य 'घटो ज्ञेयः वाच्यत्वात्' इत्यत्र सत्तावान् जातेः' इत्यत्र च लक्षणसमन्वयः प्रदर्श्यताम् ।

3. क) तत्र वादजल्पौ सप्रयोजनौ, वितण्डा तु परीक्ष्यते'–व्याख्यायताम् । 7

अथवा

'आप्तोपदेशः शब्दः' व्याख्यायताम् ।

ख) ''द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्'' इत्यत्र व्याप्तेः प्रथमलक्षणानुसारम् अव्याप्तिं प्रदर्श्य समाधानं क्रियताम् । 7

अथवा

'गुणवान् द्रव्यत्वात्'–इत्यत्र अव्याप्तिम् आशङ्क्य सिद्धान्तलक्षण-समन्वयः प्रदर्श्यताम् ।

4. अथेच्छं प्रश्नत्रितयस्योत्तरं देयम् – 2×3

i) न्यायमते कति पदार्थाः के च ते ?

ii) गौतममते प्रत्यक्षलक्षणं किम् ? न्यायसूत्रस्य कतमं सूत्रमेतत् ?

iii) उपमानलक्षणं किम् ?

iv) 'हेतुमन्निष्ठविरहाप्रतियोगिना'–इत्यस्य समासः निर्णेयः ।

v) व्याप्तेः प्रथमलक्षणे–अतिव्याप्तिवारणाय अवृत्तिशब्दस्य कीदृशः अर्थः ग्रहणीयः ।

—o—